(12) मानुषीभ्यः कथं नु स्यादस्य रूपस्य संभवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥ २८॥

व्याख्या - प्रस्तुतोऽयं श्लोकः अभिज्ञानशाकुन्तलस्य - प्रथमांकात् संगृहीतोऽस्ति। अस्मिन् श्लोके महाकविः - शकुन्तलायाः अलौकिक सौन्दर्यविषये प्रमाणम् प्रस्तौति - राजा दुष्यन्तः तस्याः जन्मवृत्तान्तं ज्ञात्वा कथयति - उपपद्यते — युज्यते अस्याः अप्सरः सम्भवत्वमिति भावः। कथमप्सरः सम्भवत्वमस्याः उपपद्यत इत्याह - मानुषीभ्यः इति मानुषीभ्यः - नानाविधमानवजाति स्त्रीभ्यः, अस्य - दृश्यमान - स्य शकुन्तलासम्बन्धिनः, रूपस्य - सौन्दर्यस्य, आकृतेर्वा, कथं नु संभवः - समुद्भवः स्यात् कथमपि न इत्यर्थः, सर्वथा मानुषाकृति वैलक्षण्यादिति भावः। उक्तमर्थं द्रढयति - नेत्यादि। प्रभया - त्विषा, तरलं - भास्वरं, प्रभा तरला - चञ्चला यस्य तदिति वा, ज्योतिः - तेजः, विद्युत् इत्यर्थः, चन्द्रादि इति केचिद्, वसुधातलात् - भूतलात्, न - उदेति - नोदयं लभते, नोत्पद्यते इत्यर्थः। यथा विद्युत् भूतलात् नोत्पद्यते तथैव मानुष्या न संम्भवतीति भावः।

अत्र एकस्याः एव उत्पत्ति क्रियायाः सम्भवो - दय पदाभ्यां पृथक् निर्देशात् प्रतिवस्तूपमालंकारः। दृष्टान्तालंकारः इति केचित्। तच्चिन्त्यम्। अनेन निदर्श - नाम नाटकभूषणमुपक्षिप्तम्। यदाह विश्वनाथो दर्पणे — पदार्थानां प्रसिद्धानां क्रियते परिकीर्तनम्।
परपक्षव्युदासार्थं तन्निदर्शनमुच्यते॥ इति।
तथात्र विलोभनाभिधं मुखसन्ध्यङ्गं चोपन्यस्तम्, यथाह - तत्रैव - "गुणाख्यानं विलोभनमिति। पथ्यावक्त्रं वृत्तम्।

अनुवाद: — मनुष्य जाति की स्त्री से ऐसे रूप की - उत्पत्ति कैसे सम्भव हो सकती है? प्रकाश से - तरल ज्योति (अर्थात् बिजली) पृथ्वी से नहीं उत्पन्न - होती।

Scanned by CamScanner